## षष्ठः पाठः संस्कृतनाट्ययुग्मम् । (सरलार्थलेखनार्थम्)

### प्रथमं पुष्पम्

संस्कृतकविषु कालिदासस्य स्थानम् अनन्यसाधारणम् । 'अभिज्ञानशाकुन्तलम्' इति तस्य प्रसिद्धं नाटकम्। तस्य काव्यनाटकेषु भारतीयसंस्कृतेः मूल्यानां च प्रतिबिम्बं दृश्यते । इदानीन्तनकालेऽपि तस्य साहित्यं जनान् रञ्जयति ।



(ततः प्रविशति वैखानसः, अन्यौ तापसौ च)

वैखानसः – (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्यः, न हन्तव्यः । आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् ।

दुष्यन्तः – प्रतिसंहृत एषः सायकः । (यथोक्तं करोति)

वैखानसः – राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते। प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः ।

दुष्यन्तः – तपोवननिवासिनामुपरोधो मा भूत् । अत्रैव रथं स्थापय यावदवतरामि ।

सूतः – धृताः प्रग्रहाः । अवतरतु आयुष्मान् ।

दुष्यन्तः – (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम । इदं तावत् गृह्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदाश्रमवासिनः दृष्ट्वाऽहमुपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः।

सूतः – तथा । (इति निष्क्रान्तः ।)

**भाषाभ्यासः**

१) **माध्यमभाषया उत्तरत ।** दुष्यन्तस्य कानि स्वभाववैशिष्ट्यानि ज्ञायन्ते ?

## द्वितीयं पुष्पम्

भासः इति संस्कृतनाट्यसृष्टेः प्रथमः नाटककारः । तस्य शैली सुबोधा सरसा च । भासनाटकचक्रे महाभारतकथाम् अनुसृत्य लिखितः शोकात्मकः एकाङ्कः नाम 'कर्णभारम्' । अस्मिन् प्रसङ्गे शक्रः नाम इन्द्रः याचकरूपेण आगत्य कर्णं कवचकुण्डलानि याचते ।



(ततः प्रविशति याचकरूपेण शक्रः ।)

शक्रः – (कर्णमुपगम्य) भोः कर्ण, महत्तरां भिक्षां याचे ।

कर्णः – दृढं प्रीतोऽस्मि भगवन् । एषोऽहं नमस्करोमि ।

शक्रः – (आत्मगतम्) किं नु खल्वहं वदामि ? यदि दीर्घायुर्भवेति वदेयम् दीर्घायुर्भवेत् । यदि न वदेयम् मूढ इति मां परिभवति । तस्माद् उभयं परिहृत्य किं नु खलु भाषे ? भवतु, दृष्टम् । (प्रकाशम्) भोः कर्ण, सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः ।

कर्णः – भगवन्, किं नोक्तम् दीर्घायुर्भवेति ? अथवा यदुक्तं तदेव शोभनम् । यतः हतेषु देहेषु गुणाः धरन्ते । भगवन्, किमिच्छसि ? किमहं ददामि ?

शक्रः – महत्तरां भिक्षां याचे ।

कर्णः – महत्तरां भिक्षां भवते प्रदास्ये । गोसहस्रं ददामि ।

शक्रः – गोसहस्रमिति ? मुहूर्तकं क्षीरं पिबामि । नेच्छामि कर्ण, नेच्छामि ।

कर्णः – किं नेच्छति भवान् ? अपर्याप्तं कनकं ददामि ।

शक्रः – गृहीत्वा गच्छामि । नेच्छामि कर्ण, नेच्छामि ।

कर्णः – तेन हि जित्वा पृथ्वीं ददामि ।

शक्रः – पृथिव्या किं करिष्यामि । नेच्छामि कर्ण, नेच्छामि ।

कर्णः – अथवा मच्छिरो ददामि ।

शक्रः – अविहा । अविहा ।

कर्णः – न भेतव्यम् न भेतव्यम् । अन्यदपि श्रूयताम् । अङ्गैः सहैव जनितं कवचं कुण्डलाभ्यां सह ददामि ।

शक्रः – (सहर्षम्) ददातु, ददातु ।

**भाषाभ्यासः**

**१) माध्यमभाषया उत्तरत ।** शक्रस्य कपटं विशदीकुरुत ।

7LSUSV

# वाचनप्रशंसा ।

(सरलार्थलेखनार्थम्)

डॉ. ए. पी. जे. अब्दुलकलाममहोदयः 'मिसाईल मॅन' इति बिरुदेन ख्यातः। तस्य जीवने तेन छात्राणां शैक्षणिकविकासार्थं नैके यत्नाः कृताः। १५ ऑक्टोबर इति तस्य जन्मदिनं 'वाचनप्रेरणादिवसरूपेण' आचर्यते। विविधानां ग्रन्थानां, लघुग्रन्थानां, वृत्तपत्राणां वाचनेन मनुष्ये के गुणाः विकसिताः भवन्ति, इत्यादयः विषयाः पद्येऽस्मिन् वर्णिताः सन्ति।






शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावहम् ॥१॥

मनुजा वाचनेनैव बोधन्ते विषयान् बहून् ।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः ॥२॥

वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः ।
तान् शिक्षयन्ति सततं ये सदा वाचने रताः ॥३॥

अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा ।
सर्वविधसुविद्यार्थं वाचनमुपकारकम् ॥४॥

वृथाभ्रमणकुक्रीडापरपीडापभाषणैः ।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ॥५॥

वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ॥६॥

१) **सन्धिविग्रहाः** -१) विज्ञानमेव = विज्ञानम् + एव। २) उत्साहो वर्धते = उत्साहः + वर्धते ।
**अन्वयः** - येन शीलं, सद्गुणसम्पत्तिः, ज्ञानं, विज्ञानम् उत्साहः च वर्धते तद् वाचनं हितावहम् एव ।

२) **सन्धिविग्रहाः** -१) वाचनेनैव = वाचनेन + एव । २) दक्षा भवन्ति = दक्षाः + भवन्ति ।
**अन्वयः** - मनुजाः वाचनेन एव बहून् विषयान् बोधन्ते । वाचनेन (मनुजाः) कार्येषु दक्षाः बहुश्रुताः (च) भवन्ति।

३) **अन्वयः** - ये सदा वाचने रताः तान् वाल्मीकि-व्यास-बाणाद्याः प्राचीनाः कविपण्डिताः शिक्षयन्ति।

४) **सन्धिविग्रहाः** -१) अद्ययावद्धि = अद्ययावत् + हि । २) पठेत्सदा = पठेत् + सदा ।
३) वाचनमुपकारकम् = वाचनम् + उपकारकम् ।
**अन्वयः** - मनुजः अद्ययावद् ज्ञानाय वृत्तपत्रं सदा हि पठेत् । सर्वविधसुविद्यार्थं वाचनम् उपकारकम् (वर्तते) ।

५) **सन्धिविग्रहाः** -१) कालक्षेपो न = कालक्षेपः + न । २) कर्तव्यो विद्यार्थी = कर्तव्यः + विद्यार्थी ।
**अन्वयः** - (विद्यार्थिभिः) वृथाभ्रमण-कुक्रीडा-परपीडा-अपभाषणैः कालक्षेपः न कर्तव्यः । विद्यार्थी वाचनं श्रयेत् ।

६) **अन्वयः** - वाचनं बाल्ये ज्ञानदं, तारुण्ये शीलरक्षकम्, वार्धक्ये दुःखहरणं (भवति) (अतः) सद्ग्रन्थवाचनं हितं (भवति)।

## भाषाभ्यासः



**१. पूर्णवाक्येन उत्तरं लिखत ।**

अ) वाचनेन के गुणाः वर्धन्ते ?

आ) वाचनेन मनुजाः किं बोधन्ते ?

इ) विद्यार्थिभिः कथं कालक्षेपः न कर्तव्यः ?

**२. माध्यमभाषया उत्तरं लिखत ।**

अ) वाचनमुपकारकं कथम् इति स्पष्टीकुरुत ।

**३. समानार्थकशब्दान् लिखत ।**

शीलम्, दक्षः, रताः, कालक्षेपः, वार्धक्यम्, पण्डितः

**४. जालरेखाचित्रं पूरयत ।**

अ)




आ)




इ)




**५. विरुद्धार्थकशब्दान् लिखत ।**

सद्गुणः, उत्साहः, प्राचीनाः, उपकारकम्

**६. सन्धिविग्रहं कुरुत ।**

अ) वाचनेनैव आ) अद्ययावद्धि

**७. विशेषण–विशेष्याणां मेलनं कुरुत ।**

| **विशेषणम्** | **विशेष्यम्** |
|---|---|
| उपकारकम् | मनुजाः |
| प्राचीनाः | विषयान् |
| दक्षाः | वाचनम् |
| बहून् | कविपण्डिताः |

**८. अमरकोषात् योग्यं समानार्थशब्दं योजयित्वा वाक्यं पुनर्लिखत ।**

अ) मनुजाः वाचनेन बहून् विषयान् बोधन्ते ।

**पठत–बोधत**

**पठनस्य दोषाः**

**गीती शीघ्री शिरःकम्पी यथालिखितपाठकः ।**
**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ।।**

**उच्चारणविषयकश्लोकः ।**

**व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।**
**भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत् ।।**

7H2QUI

# समासाः ।

**समासाः**

- **द्वन्द्वः**
  - इतरेतरद्वन्द्वः
  - समाहारद्वन्द्वः
- **तत्पुरुषः**
  - विभक्ति-तत्पुरुषः
  - उपपद-तत्पुरुषः
  - नञ्-तत्पुरुषः
  - कर्मधारयः
    - विशेषण-विशेष्य-सम्बन्धः
    - विशेषनाम-सामान्यनाम-सम्बन्धः
    - उपमान-उपमेय-सम्बन्धः
- **बहुव्रीहिः**
- **अव्ययीभावः**

द्वन्द्वः तथा च विभक्ति-तत्पुरुषः इति प्रकारद्वयम् अस्माभिः गतवर्षे पठितम् । अधुना समासानाम् अन्यप्रकारान् जानीमः ।

## पुनःस्मारणम्

**१. समासविग्रहं कुरुत ।**



धनधान्यानि ।

________



मृगशृगालौ ।

________



शुकसारिकाः ।

________



हस्तपादम् ।

________



सस्यपूर्णम् ।

________



जलव्यवस्थापनम्

________



अश्मखण्डः ।

________



नीतिनिपुणः ।

________

## २. उदाहरणैः रेखाचित्रं पूरयत ।

अ)




आ)




इ)




## ३. षष्ठीतत्पुरुषसमासस्य समस्तपदम् अन्विष्य तत्परितः वर्तुलम् आलिखत ।

| | | | | | | |
|---|---|---|---|---|---|---|
| भ्र | म | ण | स | म | यः | म् |
| ज | नः | रा | ज | ध | र्मः | ऋ |
| ल | ट्ट | चः | पु | नि | रा | ज्ञः |
| व्य | वः | हा | स्त | कः | प | स्था |
| व | नि | क्षे | क | हो | क्रि | या |
| स्था | तो | त्र | प | अ | या | स |
| प | ञ् | प | ठ | सा | सि | म् |
| न | ऋ | तिः | न | म् | द्धिः | म् |
| म् | भ्र | म् | म् | स | म् | र्मः |

१. क्षेत्रस्य पतिः ।
२. जलस्य व्यवस्थापनम् ।
३. राज्ञः धर्मः ।
४. पुस्तकस्य पठनम् ।
५. भ्रमणस्य समयः ।
६. क्रियायाः सिद्धिः ।

## ४. समासविग्रहवाक्यानां समासनामभिः मेलनं कुरुत ।

| विग्रहवाक्यम् | समासनाम |
|---|---|
| चिन्तया आकुलः | पञ्चमी-तत्पुरुषः |
| प्रजाहिते दक्षः | द्वितीया-तत्पुरुषः |
| चोरलुण्ठकेभ्यः भयम् | सप्तमी-तत्पुरुषः |
| विदेशं गमनम् | तृतीया-तत्पुरुषः |

| विग्रहवाक्यम् | समासनाम |
|---|---|
| पुस्तकपठने मग्नः | षष्ठी-त्पुरुषः |
| विद्यया विहीनः | चतुर्थी-तत्पुरुषः |
| पूजायै इदम् | सप्तमी-तत्पुरुषः |
| परागस्य कणाः | तृतीया-तत्पुरुषः |